विभक्त्यर्थादिषु वर्त्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते ॥ विभक्त्यर्थादिकों के विषें वर्त्तमान जो अव्यय सो सुबन्त करके साथ नित्य समास साकल्यं च अन्तवचनं च तानि वचनानि तेषु वचनेषु ॥ इतरेतरयोग द्वन्द्वः ॥ =
कों प्राप्त हो ॥ प्रायेण विग्रहो नित्यसमासः ॥ प्रायक करके नाम अरेतें करके जो अविग्रह होवे सो नित्यसमास होता है जो = ॥ प्रायेण अस्वपदविग्रहो
वा ॥ स्वस्य पदं स्वपदं न स्वपदं अस्वपदं अस्वपदेन विग्रह अस्वपदविग्रहः ॥ प्रायेण अत्तें करकें जो अस्वपदविग्रह होवे सो नित्यसमास =
होता है ॥ विभक्तौ उदाहरणमाह ॥ हरि ङि अधि इति स्थिते ॥ अत्र ॥ इहाँ इतिके साथ विग्रह करण ॥ और अधिके साथ समास ॥ हरौ इति।
यह विग्रह हुआ ॥ और । हरि ङि अधि ॥ यह समास हुआ ॥ इहाँ विभक्ति को एह रो इत्यत्र सप्तमी को एकवचन ङि ॥ इसकौ अर्थ क्यों ॥ हरि
विषें ॥ इस अर्थ विषें अव समान अव्यय को एण ॥ अधि ॥ एह जो अव्यय है सो सुबन्त करकें सा सा थ समास कों प्राप्त हो ॥ अव्ययं विभक्तिसमीपे नित्यसमासः होएण
समासः ॥ हरि ङि अधि यह समास हुआ ॥ करकें स्थित हुआ ॥ प्रथमानिर्दिष्टं समास उपसर्जनं ॥ १।२।४३ ॥ प्रथमया निर्दिष्टं प्रथमानिर्दिष्टं ॥
समासशास्त्रे प्रथमानिर्दिष्टं उपसर्जनसंज्ञं स्यात् ॥ समासविधायक सूत्र विषें प्रथमानिर्दिष्ट जो पद सो उपसर्जन संज्ञक जाणना ॥ उपसर्जनसंज्ञायाः किं
फलं ॥ उपसर्जनं पूर्वम् ॥ २।२।३० ॥ समासे उपसर्जनं प्राक् प्रयोज्यं ॥ समास विषें उपसर्जन पूर्व प्रयोज्य है । पूर्व जोड़ने जोग्य होता है ॥ तो समासवि
धायक शास्त्र विषें प्रथमानिर्दिष्ट पद को एण ॥ अव्ययमिति । और समास विषें अव्यय को एण ॥ अधीति । इसकी उपसर्जन संज्ञा होई । उपसर्जन संज्ञा
होए सें ॥ अधि का प्राक् प्रयोग हुआ ॥ अर्थात् पूर्व जोड़ या गया ॥ इत्यधेः प्राक् प्रयोगः ॥ अधि हरि ङि ॥ इति जातं ॥ अधि और अधि अ
की यह है । इसकरकें सु का लुक् होय गया है ॥ इसकरकें । अधि हरि ङि । ई हां अधि सें अगाड़ी प्रथमा का एकवचन सु नहिं लिखया ॥ समास
मान्तत्वे धातु प्रातिपदिकयोः ॥ अनेन शास्त्रेण सुपस्य लुक् ॥ अधि हरि ॥ इति जातं ॥ समासत्वात् प्रातिपदिक संज्ञा ॥ इहां तो सप्तमी के एकवचन ङि स
हित ही समास है ॥ सो इहां तो अव ङि का लुक् होइ गया ॥ और इसवास्तें समास तो इहां अव है नहिं ॥ मैं इसवास्तें लिखा है कि ॥ एकदेशविकृतस्यान
न्यत्वात् प्रातिपदिक संज्ञायां स्वाद्युत्पत्तिः ॥ एकदेशविकृत होए सें अन्य की न्याईं नहिं होता । यथा छिन्ने पुच्छे श्वा गर्धवो न भवति ॥
इति न्यायेन ॥ प्रातिपदिक संज्ञा होए सें पुनः स्वाद्युत्पत्तिः ॥ परं तु अव्ययों में सूत्र लिखा है । कि ॥ अव्ययीभावश्च ॥ अर्थात् अव्ययीभाव
जो समास है सो अव्यय होता है ॥ इसकरकें जव अव्यय संज्ञा भई तो अव्ययादाप्सुपः ॥ अनेन सुपः लुक् ॥ सो इसी आशय कों लेकर
संस्कृत लिखा है ॥ मूल में ॥ अव्ययीभावश्च त्वाव्ययत्वात् सुपो लुक् ॥ अधि हरि ॥ इति समाससिद्धिः ॥ हरौ इत्यधि हरि ॥
हरि विषें जो होवे वे ॥ सो कहिये ॥ अधि हरि ॥ अव्ययीभावश्च ॥ अयं नपुंसकं स्यात् ॥ गोः पाति इति गोपाः तस्मिन्नित्यधिगोपं ॥

© Dharmarth Trust. Digitized By eGangotri

अत्र गोपे इति। यह विग्रह हुआ॥ गोपे ङि अधि॥ यह समास हुआ तो ऐसा स्थित होया॥ अव गोपा ङि अधि इत्यवस्थायां॥ अव्ययीभावश्च॥ अयं नपुंसकं
स्यात्॥ अव्ययीभाव जो है सो नपुंसक जानना॥ नपुंसक करके लिंक लम्॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ नपुंसके अजन्त प्रातिपदिकस्य ह्रस्वः स्यात्॥ अने
न ह्रस्वः॥ गोप ङि अधि इति जातं॥ पुनः अधि इत्यस्य पूर्ववत् उपसर्जनसंज्ञा। पूर्वप्रयोग॥ अधि गोप ङि। इति जातं॥ समासत्वात् प्रातिपदिकसंज्ञा॥ सु
पोधातुप्रातिपदिकयोः॥ अनेन सुपस्य लुक्॥ अधि गोप इति जातं॥ एकदेशविकृतस्यानन्यत्वात्॥ प्रातिपदिकसंज्ञायां पुनः स्वाद्युत्पत्तिः॥ अधि गोप
सु। इति जातं॥ अव्ययीभाव जो समास है सो अव्यय होता है। इस करके। अव्ययादाप्सुपः॥ अनेन सुपः लुक्॥ अधि गोप इति जातं॥ नाव्ययीभावादतो
ऽम्त्वपञ्चम्याः॥ अदन्तादव्ययीभावात् सुपो न लुक्॥ तस्य पंचमीं विना अमादेशः॥ अदंत जो अव्ययीभाव तिससे परे सुप का लुक् न हो किंतु तिसको तो
पंचमी विभक्ति से विना अम् आदेश हो॥ इस करके सु समुदाय के स्थान में अम् आदेश होया॥ अधि गोप अम्॥ इति जातं॥ अमि पूर्वः॥ अनेन पूर्वरू
पः॥ अधिगोपम्॥ इति प्रयोगसिद्धिः॥ गोपे इत्यधिगोपम्॥ गाः पातीति गोपाः॥ गौओं की जो रक्षा करे तिसको कहिये गोपाः। तस्मिन्नित्यधि
गोपम्॥ तिस विषे जो होवे तिसको कहिये अधिगोपम्॥ यह विभक्ति विषे उदाहरण है॥ कृष्णस्य समीपं उप कृष्ण अम्॥ कृष्णस्य समीपं इति वि
ग्रहे॥ समासे कृते। कृष्ण ङस् उप॥ इति जातं॥ इहां समीपार्थक उप अव्यय है॥ उपसर्जनसंज्ञा। पूर्वप्रयोगः॥ उप कृष्ण ङस् इति जातं॥ समास
त्वात् प्रातिपदिकसंज्ञा॥ सुपः लुक्॥ एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञा॥ पुनः स्वाद्युत्पत्तिः॥ उप कृष्ण ङस् इति जातं॥ पूर्वसूत्रेण
नाव्ययीभावेति। ङस् स्थाने अमादेशः॥ अमि पूर्वः॥ उपकृष्णम्॥ इति प्रयोगसिद्धिः॥ कृष्ण के जो समीप जो होवे तिसको कहिये उपकृष्णम्॥ तृतीया
सप्तम्योर्बहुलम्॥ अदन्तादव्ययीभावात् तृतीयासप्तम्योर्बहुलम् अम्भावः॥ अदन्त जो अव्ययीभाव तिससे परे तृतीया सप्तमी को बहुलता करके विकल्प करके
अम्भाव हो॥ उपकृष्णेन॥ उपकृष्णं॥ उपकृष्णे। उपकृष्णं॥ पूर्ववत् प्रयोगसिद्धिः॥ यह समीप अर्थ में उदाहरण है॥ अथ समृद्ध्यर्थे उदाहरणमाह॥ समृ
द्धिः समृद्धिः॥ मद्राणां समृद्धिः इति विग्रहे॥ मद्र आम् सु॥ इति समासः॥ अत्र सु अव्यय यह समृद्ध्यर्थक है॥ पूर्ववत् प्रयोगसिद्धिः॥ सुमद्रम्॥ मद्र देश
विशेषः॥ मद्र देशों की जो समृद्धि सो ताको कहिये सुमद्रम्॥ मद्र दक्षिण देश में कई ग्राम होते हैं॥ उनको भी देश कहते हैं॥ अथ व्यृद्ध्यर्थे उदा
हरणमाह॥ यवनानां व्यृद्धिः॥ इति विग्रहे॥ यवन आम् दुर्॥ इति समासे कृते इति जातं॥ विगता ऋद्धिः व्यृद्धिः॥ अत्र व्यृद्ध्यर्थक दुर् अव्ययः॥
पूर्ववत् प्रयोगसिद्धिः॥ अत्र नाव्ययीभावेति अम्॥ दुर्यवनम्॥ इति प्रयोगसिद्धिः॥ यवनों की जो ऋद्धि नाम वृद्धि सो दूर है॥ नाम नष्ट हो है॥ अ
थ अर्थाभावे उदाहरणमाह॥ अर्थस्याभावः अर्थाभावः॥ मक्षिकाणाम् अभावः इति विग्रहे॥ मक्षिक आम् निर्॥ इति समासे कृते इति जा
तं॥ अत्र अभावार्थ निर् अव्ययः॥ नाव्ययीभावेति सूत्रेण अम्॥ निर्मक्षिकम्॥ इति प्रयोगसिद्धिः॥ मक्षिनाम मक्खियों का है। जहां जिस जगह्या
को मक्खियों का अभाव होवे उसको कहिये निर्मक्षिकम्॥ इहां भी पूर्ववत् अम् भाव जानना॥ परं तु तृतीया सप्तमी को बहुलता करके होता है॥ हि॥
अथ अत्ययार्थे उदाहरणमाह॥ अत्ययो नाशः॥ हिमस्य अत्ययः॥ इति विग्रहे॥ हिम ङस् निर्॥ इति समासे कृते इति जातं॥ अत्र निर् अव्ययः
अत्ययार्थकः॥ पूर्ववत् अमादेशः॥ निर्हिमम्॥ इति पूर्ववत् प्रयोगसिद्धिः॥ जिस देशादिक में हिम का नाश होवे उसको कहिये निर्हिमम्॥ अथ
असंप्रत्यर्थे उदाहरणमाह॥ संप्रति शब्दः इदानीमित्यर्थे॥ निद्रा संप्रति इति विग्रहे। निद्रा टा अति॥ इति समासे कृते इति जातं॥ अत्र
असंप्रत्यर्थक॥ अति अव्ययः॥ पूर्ववत् अमादेशः॥ अतिनिद्रम् इति प्रयोगसिद्धिः॥ इस काल के विषे नींद ~~[illegible]~~
स= होवे तिसको कहिये अतिनिद्रम्॥ अथ शब्दप्रादुर्भावार्थे उदाहरणमाह॥ प्रादुर्भावः उत्पत्तिः॥ हरिशब्द [illegible]

करके नींद जुड़ी नहीं होया होवे =१   =१ अर्थात् सर्वकाल निद्रा करके युक्त रहे॥=१

अपतत्र तीयबाने नाव्ययीभावेतिसूत्रे एअम॥ सुमद्रम्॥

न=१

© Dharmarth Trust. Digitized By eGangotri

सु०
४

इति विग्रहे ॥ समासः । समासे कृते ॥ हरि ङस् इति ॥ इति जातम् ॥ अत्र प्रादुर्भावार्थक इति अव्ययं ॥ पूर्ववत् प्रयोगसिद्धिः ॥ इति हरि ॥ इति प्रयोगसिद्धिः ॥
हरि शब्द को जहां प्रकाश होवे ॥ उस को कहिये इति हरि ॥ अथ पश्चादर्थे उदाहरणमाह ॥ विष्णोः पश्चात् । इति विग्रहे ॥ विष्णु ङस् अनु ॥ इति समा
से कृते इति जातं ॥ अत्र पश्चादर्थक अनु अव्ययं ॥ पूर्ववत् प्रयोगसिद्धिः ॥ अनुविष्णु ॥ इति प्रयोगसिद्धिः ॥ विष्णु से पीछे जो होवे । सो कहिये अ
नुविष्णु ॥ योग्यता वीप्सा पदार्थानतिवृत्ति सादृश्यानि यथार्थाः ॥ योग्यस्य भावः योग्यता ॥ व्याप्तुमिच्छा वीप्सा ॥ अतिवर्तनं अतिवृद्धि
त्तिः । न अतिवृत्तिः अनतिवृत्तिः ॥ पदार्थस्य अनतिवृत्तिः । पदार्थानतिवृत्तिः ॥ सदृशस्य भावः सादृश्यम् ॥ यथा शब्दस्य अर्थाः । य
थार्थाः ॥ योग्यता च वीप्सा च पदार्थानतिवृत्तिश्च सादृश्यं च ताः योग्यता वीप्सा पदार्थानतिवृत्ति सादृश्यानि ॥ इति इतरेतरयोग द्वंद्वः ।
यह चार यथा शब्द के अर्थ हैं ॥ अथ योग्यतार्थे उदाहरणमाह ॥ रूपस्य योग्यम् । इति विग्रहे ॥ रूप ङस् अनु ॥ सं इति समासे कृते इति जातं ॥ पूर्ववत् प्रयो

सिद्धिः = गः ॥ अत्र नाव्ययीभावात् ॰ इति सूत्रेण अमादेशः ॥ अनुरूपम् ॥ इति ॥ रूप के योग्य जो होवे उस को कहिये अनुरूपम् ॥ अथ वीप्सार्थे उदाहरणमाह ॥
अर्थम् अर्थं प्रति । इति विग्रहे ॥ अर्थ अम् प्रति ॥ इति समासे कृते इति जातं ॥ पूर्ववत् प्रयोगसिद्धिः ॥ नाव्ययीभावात् ॰ इति सूत्रेण अमादेशः ॥ इको
यणचि ॥ अनेन यणादेशः ॥ प्रत्यर्थम् ॥ अर्थ अर्थ के प्रति जिस को व्याप्त होने कि इच्छा होवे उस को कहिये प्रत्यर्थं ॥ अथ पदार्थान
तिवृत्त्यर्थे उदाहरणमाह ॥ शक्तिं अनतिक्रम्य इति विग्रहे ॥ समासः । समासे कृते इति जं ॥ यथा शक्ति अम् ॥ इति जातं ॥ अत्र अमादे
शो न भवति कुतः अदन्तत्वाभावात् ॥ पूर्ववत् प्रयोगसिद्धिः ॥ यथाशक्ति ॥ इति ॥ अतिक्रान्त्वा इति अतिक्रम्य ॥ न अतिक्रम्य अनतिक्रम्य ॥

तु = अपनी शक्ति को उल्लंघन करके जो नहिं कार्य्य कर्त्ता है उस कौ र्य कों कहिये यथाशक्ति ॥ अव्ययीभावे चाकाले ॥ सहस्य सः स्यादव्ययीभावे न तु का
ले ॥ अव्ययीभाव विषे सह शब्द कों स आदेश हो ॥ न तु काले ॥ कालवाचिक जो सह शब्द तिस कों स आदेश न हो ॥ हरेः सादृश्यं ॥ इति विग्रहे समासः
समासे कृते । हरि ङस् सह । इति जातं ॥ अत्र सादृश्यार्थक हि सह अव्यय है ॥ सह का पूर्वनिपात हुआ ॥ और सह शब्द कों स आदेश हुआ ॥ सहरि ॥
इति प्रयोगसिद्धिः ॥ सदृशस्य भावः सादृश्यं ॥ हरि के जो सदृश होवे उस कों कहिये सहरि ॥ काले तु ॥ सह पूर्वाह्नं ॥ पूर्वं च तत् अहः । पूर्वाह्नं । पूर्वाह्नस्य
सादृश्यं सह पूर्वाह्नं ॥ इहां कालवाचिक सह शब्द है तो इहां सह शब्द कों स आदेश नहिं होया ॥ इति यथा शब्दस्यार्थः समाप्तः ॥ अथ आनुपूर्व्ये उदाहरणं ॥
आनुपूर्व्यः क्रमः ॥ ज्येष्ठस्य आनुपूर्व्येण ॥ इति विग्रहे समासः । समासे कृते इति जातं ॥ ज्येष्ठ ङस् अनु ॥ इति जातं ॥ इहां आनुपूर्व्य अर्थ में अनु अव्यय है ॥ सु स्थाने अ
मादेशः ॥ अनुज्येष्ठम् ॥ ज्येष्ठ के जो क्रम करके होया होवे उस कों कहिये अनुज्येष्ठम् ॥ अर्थात् क्रम करके जो बडे से छोटा होवे उस का नाम रहा ॥ अथ यौगपद्ये उदाहरणं ॥
युगपदेव इति यौगपद्यं ॥ चक्रेण युगपत् ॥ इति विग्रहे ॥ स चक्र टा सह ॥ इति समासे कृते इति जातं ॥ सचक्रम् ॥ इति सिद्धिः ॥ चक्र करके जो एक काल सं

कर्के = दर्शन को प्राप्त होवे ॥ उस कों कहिये सचक्रम् ॥ अर्थात् एक काल में ॥ सख्या सदृशः ॥ इति विग्रहे ॥ सखि टा सह इमे तिस मासः ॥ और सस खि इति प्रयोगसिद्धिः ॥ मि
त्र करके जो सदृश होवे उस कों कहिये ससखि ॥ इहां गुण करके सदृश का ग्रहण है ॥ अथ संपत्त्यर्थे उदाहरणमाह ॥ क्षत्राणां संपत्तिः ॥ इति विग्रहे ॥ क्षत्र आम्
सह ॥ इति समासः ॥ इहां संपत्त्यर्थक सह से अव्यय है ॥ उस के स्थान में अमादेश ॥ सक्षत्रम् ॥ क्षतात् दुःखात् त्रायते रक्षतेइ ति क्षत्रः तेषां क्षत्राणां ॥ क्षत्रों की को
जो संपत्ति होवे सो कहिये सक्षत्रम् ॥ अथ साकल्यार्थे उदाहरणं ॥ तृणमप्यपरित्यज्य इति विग्रहे ॥ तृण अम् सह ॥ समासे कृते इति जातं ॥ इहां परित्यज्य
के अर्थ में सह अव्यय है ॥ सतृणम् ॥ न परित्यज्य अपरित्यज्य ॥ तृण कों जो मैं नहिं त्याग करके भोजन करके उस कों कहिये सतृणम् ॥ अर्थात् तृ
ण सहित हि भोजन करलेवे सो उस पुरुष का नाम रहा ॥ इहां अतिक्रिया है ॥ अथान्तवचनार्थे उदाहरणमाह ॥ अग्निग्रन्थपर्यन्तम् ॥ इति विग्रहे ॥ अग्निग्रन्थ
अग्निग्रन्थ पर्य्यन्त वचनं अन्तवचनं ॥

अयोग्यार्थे
अनु अव्ययं
अव्ययीभावो नेका
र्थत्वात् ॥ २८

© Dharmarth Trust. Digitized By eGangotri

विभाषा २।१।११ अधिकारोयम् ॥=२

कथितं=२

नदीभिश्च ॥ नदीभिः सह संख्या वा समस्यते ॥ नदीवाचक से जो शब्द तिसके सेसाथ संख्यावाचक जो शब्द सो समास को प्राप्त हो विकल्प करके ॥ समाहारे चायमिष्यते ॥ इति भाष्ये ॥ इष्टिहे ॥ ई अयं समासः समाहारे इष्यते ॥ समाहारः समूहः ॥ पंचानां गंगानां समाहारः ॥ इति विग्रहः ॥ पञ्चन् आम् गंगा आम् ॥

द्विषे=३ इति समासः स्थितिः ॥ समाहारे अत्र विग्रहः ॥ नलोपः प्रातिपदिकांतस्य ॥ अनेन नकारस्य लोपः ॥ हृस्वो नपुंसके प्रातिपदिकस्य ॥ अनेन हृस्वः ॥ पंचगंगम् ॥ अत्र नाव्ययीभावेति अमादेशः ॥ द्वयोः यमुनयोः समाहारः ॥ इति विग्रहः ॥ द्वि औस् यमुना ओस् ॥ इति समासः स्थितिः ॥ द्वियमुनम् ॥ इति सिद्धिः ॥ आपूर्व सूत्रेण हृस्वः । अमादेशः ॥ दोय मुनों का जो समाहार तिसकों कहिये द्वियमुनम् ॥ तद्धिताः ॥ आ पंचम समाप्तेर् अधिकारोयम् ॥ अव्ययीभावे शरत्प्रभृतिभ्यः ॥ ५।४।१०७ ॥ शरदादिभ्यष्टच् स्यात् समासांतोऽव्ययीभावे ॥ अव्ययीभाव विषें शरदादियों से टच् प्रत्यय हो ॥ स च समासांतः ॥ सो टच् प्रत्यय समास के अंत विषें जाणना ॥ समास के अंत विषें हो ॥ शरदः समीपं ॥ इति विग्रहः ॥ शरद ङस् उप ॥ इति समास स्थितिः ॥ अत्र समीपार्थे उपशब्दः ॥ सुस्थाने नाव्ययीभावेति अमादेशः ॥ उपशरदम् ॥ शरद ऋतु के जो समीप हो वे ऋतु उसकों कहिये उपशरदम् ॥ प्रतिविपाशं प्रति ॥ वीप्सार्थे इति विग्रहः ॥ विपाश् अम् प्रति ॥ इति समासस्थितिः ॥ और अव्ययसें परें विभक्ति आती नहिं ॥ समासत्वात् सुपो लुक् ॥ विपाश प्रति इति जाते ॥ पूर्वनिपातः प्रतिविपाश ॥ पुंसः नः स्वाधुत्वात् ॥ टच् प्रत्ययः ॥ विपाश अ इति जाते ॥ सुस्थाने अमादेशः ॥ अभिपूर्वे ॥ प्रतिविपाशम् ॥

॥ अथ शरदादिगणः ॥ शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश् दृश् विश् चेतस् चतुर् त्यद् तद् यद् कियत् ॥ जराया जरस् च ॥ जरा शब्द कों जरस् आदेश हो च पुनः टच् प्रत्यय हो ॥ जरसः समीपं इति विग्रह ॥ ~~मजरे~~ जरा ङस् उप इति समासस्थितिः ॥ अत्र ॥ नाव्ययीभावेति सूत्रेण सुस्थाने अमादेशः ॥ उपजरसम् ॥ इति सिद्धिः ॥ जरा नाम हे वृद्धावस्था का ॥ जरा के समीप जो होवे अवस्था तिसकों कहिये ॥ उपजरसम् ॥ इत्यादि ॥ अनेश्च ५।४।१०८ ॥ अन्नंतादव्ययीभावाट्टच् स्यात् ॥ अन् है अंत में जिसके ऐसा जो अव्ययीभाव तिससें टच् प्रत्यय हो ॥ तद्धिता द्विकासत ॥ तद्धित विषें ॥ सो तद्धित जाणना ॥ इत्यर्थः ॥ नस्तद्धिते ॥ ६।४।१४४ ॥ नान्तस्य भस्य टेर्लोपः स्यात् तद्धिते परे ॥ नान्त जो भसंज्ञक शब्द तिसकी जो टि तिसका लोप हो ॥ तद्धित परहो संते ॥ राज्ञः समीपं ॥ इति विग्रहे ॥ राजन् ङस् उप ॥ इति समासस्थितिः ॥ ई सुपः लुक् ॥ टच् ॥ उपराजन् अ ॥ टि लोपः ॥ सुस्थाने अमादेशः ॥ उपराजम् ॥ इति सिद्धिः ॥ राजा के जो समीप होवे ॥ तिसकों कहिये उपराजम् ॥ नपुंसकादन्यतरस्याम् ॥ अन्नंतं यत् क्लीबं तदंतादव्ययीभावाट्टज्वा स्यात् ॥ अन्नंत जो क्लीब होवे अंत में जिसके ऐसा जो अव्ययीभाव तिससें टच् प्रत्यय हो ॥ विकल्प करके ॥ चर्मणः समीपं इति विग्रहे ॥ चर्मन् ङस् उप इति समासस्थितिः ॥ पक्षे टच् ॥ टच् अभाव पक्षे ॥ नलोपः प्रातिपदिकांतस्य ॥ अनेन नकारस्य लोपः ॥ टच् पक्षे टिलोपः ॥ सुस्थाने अमादेशः ॥ उपचर्मं । उपचर्म ॥ इति समासः ॥ चर्म के जो समीप होवे उसकों कहिये उपचर्म ॥ झयः ॥ ५।४।१११ ॥ झयन्तादव्ययीभावाट्टज्वा स्यात् ॥ झयन्त जो अव्ययीभाव तिससें टच् हो विकल्प करके ॥ समिधः समीपं इति विग्रहे ॥ समिध् ङस् उप ॥ समासे कृते इति जाते ॥ पक्षे टच् ॥ सुस्थाने अमा...

संख्यैत्यादि जिस जो समानाधिकरण विषय । एकस्वभावः सन्तान प्रवन्धो वंशो विद्या जन्मकृतो द्विविधस्तत्र विद्यया समानस्वभाव विषये द्विमुनीति । मुनि...नी त्रिकाव्याकरणे ॥ त्रिमुनीति पत ज्ञलि सहितौ तौ ॥

त्रिमुनि व्याकरण मिति । सामानाधिकरण्ये त्याद्व...वत्रिनाशः स्यात् । विद्येति । तथा च बहुव्रीहौ त्रिमुनि व्याकरणम् । अव्ययीभावे व्याकरणस्य त्रिमुनि इति प्रयोगः ...एवेति भावः ॥

अभिपूर्वः=८

अनस=२

© Dharmarth Trust. Digitized By eGangotri

© Dharmarth Trust. Digitized By eGangotri

एवं भास् दीप्तौ ॥ क्विप् । लोपः । सुप्रत्ययः । सुलोपः । भास् । इति जातं ॥ रुत्वविसर्गौ ॥ भाः । भासौ । भासः । भाभ्यां
भाभिः ॥ अत्र तु । सकारस्य रुत्वे कृते । पुनः भोभगोअघो अपूर्वस्य योऽशि ॥ अनेन यादेशे कृते ॥ लोपः
शाकल्यस्य ॥ अनेन या लोपे कृते ते । भाभ्यां ॥ इति सिद्धं ॥ एवं सर्वत्र ॥ भासि भासोः भासु ॥ भासतेऽइति
भाः ॥ राल्लोपः ॥ रेफात्परस्य छकार वकारस्य लोपः स्यात् क्वौ झलादौ क्ङिति ॥ धुर्वी हिंसायां ॥ क्विप् । क्वि
पः लोपः ॥ धुर्व् इति जातं ॥ राल्लोपः ॥ इति वलोपः ॥ धुर् इति जातं ॥ र्वोरुपधाया दीर्घ इकः ॥ अनेन दीर्घः ॥
धूर् इति जातं ॥ सुप्रत्ययः सुलोपः ॥ खरवसानयोर्विसर्जनीयः इति रेफस्य विसर्गः ॥ धूः ॥ धुरौ धुरः ॥ धूर्भ्यां धूर्भिः
सप्तमी । धुरि धुरोः धूर्षु ॥ आदेशप्रत्यययोः । अनेन षत्वं ॥ धूर्वति इति धूः ॥ द्युत दीप्तौ ॥ वि पूर्वक ॥ वि
द्युत् क्विप् ॥ क्विपः लोपः ॥ विद्युत् इति जातं सुप्रत्ययः सुलोपः ॥ झलां जशोऽन्ते इति दः वाऽवसाने इति दत्वे
तः ॥ विद्युद् विद्युत् विद्युतौ विद्युतः ॥ विद्युद्भ्यां विद्युद्भिः ॥ इत्यादि ॥ विद्युत्सु ॥ इति सप्तमी बहुव
चनस्य ॥ अत्र तु झलां जशोऽन्ते इति दः खरि च इति तः ॥ विशेषेण द्योतते इति विद्युत् ॥ ऊर्ज बलप्र
ाणनयोः ॥ अस्मात् क्विप् । क्विपः लोपः ॥ ऊर्ज् इति जातं सुप्रत्यय सुलोपः ॥ चोः कुः ॥ अनेन
गः । ऊर्ग् इति जातं ॥ वाऽवसाने पक्षे कः ॥ ऊर्क् ऊर्ग् ऊर्जौ ऊर्जः ॥ ऊर्ग्भ्यां ऊर्ग्भिः । पुनः सदृशं ॥ ऊर्जि ऊ
र्जोः ॥ इत्यादि ॥ सप्तमी बहुवचने ॥ चोः कुः । अनेन गः । खरि च इति कः आदेशप्रत्य
योः षत्वं ॥ कषसंयोगे क्षः ॥ ऊर्क्षु ॥ इति । ऊर्जति इति ऊर्क् ॥ एवं पृ पालनपूरणयोः ॥ क्विपः
लोपः ॥ उदोष्ठ्यपूर्वस्य इति ऋकारस्य उत्वं ॥ उरण् रपरः अनेन रपरः ॥ पुर् इति जातं ॥ र्वोरुपधा
या दीर्घ इकः ॥ अनेन दीर्घः ॥ पूर् इति जातं ॥ सुप्रत्यय सुलोपः ॥ रेफस्य विसर्गः ॥ पूः ॥ पुरौ पुरः
पूर्भ्यां । पूर्भिः ॥ इत्यादि ॥ सप्तमी पुरि पुरोः पूर्षु । पिपर्ति इति पूः ॥ उत्तरसूत्रात् द्विशः ॥

© Dharmarth Trust. Digitized By eGangotri

ग्रह एणस्यापकर्षे एत्तज्जवतेर्दीर्घः ॥ उत्तरसूत्रेद्वित्त्वहणस्य विध्यन्तर विशेषसमर्थकत्वेन वक्ष्यमाणत्वात्तदपि
३ तदपकर्षे दीर्घ इत्याह ॥ जवतेरिति ॥ जुगतौ ॥ क्विप् । सर्वापहारिलोपे कृते ॥ जु इति जातं ॥ कृदन्तत्वात्प्राति
पदिकसंज्ञा ॥ सुप्रत्ययरुत्वविसर्गौ ॥ स्त्रग्रहणापकर्षणाद्दीर्घः ॥ जूः इति सिद्धं ॥ जवतेरितिजूः ॥ जुवौ ।
जुवः ॥ अत्र अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ॥ अनेन उवङ् ॥ जुवम् । जुवौ जुवः । जूभ्यां । जूभिः । जूषु ॥ इति
ग्रावस्तुत ॥ ग्रावं पाषाणादिकं स्तौतीति विग्रहे ॥ ष्टुञ् स्तुतौ ॥ धात्वादेः षः सः । निमित्तापाये नैमित्तिक
स्यापायः ॥ ग्रावं स्तु इति जाते ॥ क्विप् । लोपः ॥ ह्रस्वस्य पिति कृति तुक् ॥ अनेन तुक् ॥ ग्रावं स्तु
इति जातं ॥ पश्चात्कर्मण्युपपदे समासः ॥ ग्रावशब्दस्य धातुना समासः सुप्रत्ययहल्लोपः ॥ झलां जशोऽन्ते ॥ ग्रावस्तुद्
शोऽन्ते ॥ द । वावसाने । पदेन त् ॥ ग्रावस्तुद् ग्रावस्तुत् ग्रावस्तुतौ ग्रावस्तुतः । ग्रावस्तुद्भ्यां ग्रावस्तुद्भिः ॥ ग्राव
स्तुत्स्तु [illegible] इति ॥ ग्रावं पाषाणादिकं स्तौतीति ग्रावस्तुत ॥ क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसा
रणं च ॥ क्विप्प्रत्यये [illegible] ॥ तानां सर्वां धातूनां दीर्घः स्यात् असम्प्रसारणं च ॥ वचु परिभाषणे । क्विप् ।
लोपः ॥ पूर्वोक्तवार्तिकेन दीर्घः ॥ सुप्रत्ययहल्लोपः ॥ चोः कुः ॥ अनेन कुत्वं ॥ झलां जशोऽन्ते गः । वावसाने
पदे क ॥ वाक् वाग् वाचौ वाचः ॥ वाग्भ्यां । अत्र तु कुत्वं भवति । पुनः झलां जशोऽन्ते गः ॥ वाग्भिः । वाक्षु ॥
अत्र कुत्वं ॥ झलां जशोऽन्ते गः । खरि च क । आदेशप्रत्यययोः षत्व । कषसंयोगे क्ष ॥ वाक्षु इति सिद्धं ॥ वक्ती
ति वाक् ॥ प्रच्छ ज्ञीप्सायां ॥ प्रच्छ । ज्ञीप्सा तस्यां ॥ क्विप् । लोपः । पूर्वोक्तवार्तिकेन दीर्घः । हल्लोपः ॥ व्रश्च
भ्रस्जेति छस्य षः । झलां जशोऽन्ते डः ॥ वावसाने विपदे ट ॥ प्राट् प्राड् प्राशौ प्राशः ॥ प्राड्भ्यां प्राट्सु । प्राट्त्सु
पृच्छतीति प्राट् ॥ एवं आयतं स्तौतीति आयतस्तूः ॥ क्विप् लोपः ॥ पूर्वोक्तवार्तिकेन दीर्घः ॥ सुप्रत्ययरुत्व
विसर्गौ ॥ आयतस्तूः । आयतस्तुवौ ॥ अग्रे अचि श्नुधातुभ्रुवां ॥ अनेन उवङ् ॥ आयतस्तुवः ॥ आयतस्तू
भ्यां ॥ आयतस्तूषु ॥ एवं कटं प्रवते इति कटप्रूः ॥ प्रुङ् गतौ ॥ क्विप् । लोपः । दीर्घः । समासः । कटप्रूः ।

[illegible] (left-margin note, written vertically)

© Dharmarth Trust. Digitized By eGangotri

अथ विधातु०। अनेन ष्ट्रङ् ॥ ४४ ॥

कटत्रूः। कटत्रुवौ ॥ कटत्रुवः ॥ कटत्रूभ्यां। कटत्रूषु ॥ त्रूरु रुः ॥ श्रिञ् सेवायां ॥ क्विप् ॥ लोपः ॥ वार्त्तिकेन दी-
र्घः। सुप्रत्यय रुत्व विसर्गौ ॥ श्रीः ॥ श्रियौ। श्रियः ॥ श्रीभ्यां ॥ श्रीभिः। श्रीषु ॥ हरिं श्रयति इति श्रीः ॥
दावनीशसयुयुजस्तुतुदसिसिचमिहपतदंशनहः करणे ॥ दावादेः ष्ट्रन् स्यात् करणेऽर्थे ॥ दाप् लवने ॥ लवणं छेदनं ॥
तस्मात् ष्ट्रन् प्रत्ययः ॥ षः प्रत्ययस्य ॥ अनेन षकारस्येत्संज्ञा ॥ मित्तिशायाय में भित्तिकस्याप्यपायः ॥ दात्र इति
जातं ॥ सुप्रत्ययः। अतोम्। अमि पूर्वः ॥ दात्रम् ॥ अत्र करणेऽर्थे ष्ट्रन् प्रत्ययो भवति ॥ अस्मात्। दात्यनेनेति दात्रम् ॥
एवं णीञ् प्रापणे ॥ णो नः ॥ धात्वादेः णस्य नः ॥ नी इति जातं ॥ ष्ट्रन् प्रत्ययः ॥ सार्वधातुकार्धधातुकयोः ॥
अनेन गुणः ॥ सुप्रत्ययः। अतोम्। अमि पूर्वः ॥ नेत्रम् ॥ नयति विषयं प्रत्यनेनेति नेत्रम् ॥ तितुत्रतथसिसुसर
कसेषु च ॥ एषां दशानां कृत्प्रत्ययानामिण् न स्यात् ॥ प्रत्ययेन षष्ठ्यर्थे सप्तमी त्याह ॥ एषां दशानामिति ॥ ति। तुन्।
ष्ट्रन्। तन्। कथन्। कसि। सुच्। कसरन् ॥ कन्। स ॥ इत्येषामित्यर्थः ॥ तत्र ति इति क्ति क्तिचौ ग्रहणम् ॥
शस्त्रमिति ॥ शसत्यनेनेति विग्रहे ॥ शसु हिंसायाम् ष्ट्रन् तस्य बलाद्यार्द्धधातुकत्वेन प्राप्तस्येटोऽनेन निषेधः ॥ सु
प्रत्ययः ॥ अतोम् ॥ अमि पूर्वः ॥ शस्त्रम् ॥ योत्रमिति ॥ योत्यनेनेति विग्रहे ॥ युमिश्रणामिश्रणयोः ॥ ष्ट्रन् प्रत्य
यः ॥ ~~पुगन्तलघूपधस्य च~~ ॥ अनेन गुणः। सुप्रत्ययः ॥ अतोम् ॥ अमि पूर्वः ॥ योत्रम् ॥ योक्त्रमिति ॥ युनक्त्यनेनेति
विग्रहे ॥ युजिर् योगे ॥ इर इत्संज्ञा वाच्या ॥ अस्मान्निष्ठकादेव नेट् ॥ चोः कुरिति कुत्वं ॥ खरि चेति। गस्य कः ॥ पुगं
तलघूपधस्य च ॥ अनेन गुणः ॥ कै योक्त्रम् ॥ तोत्यनेनेति विग्रहे। ष्टुञ् स्तुतौ ॥ पुगन्तलघूपधस्य च ॥ अ
नेन गुणः ॥ स्तोत्रम् ॥ तोत्रमिति ॥ तुदत्यनेनेति विग्रहे। तुद व्यथने ॥ पुगन्तलघूपधस्येति गुणः। खरि
चेति दस्य तः ॥ तोत्रम् ॥ सेत्रमिति ॥ सिनोत्यनेनेति विग्रहे। षिञ् बन्धने ॥ धात्वोदेः षस्सः ॥ पुगन्ते
तिगुणः ॥ सेत्रम् ॥ सेक्त्रमिति ॥ सिञ्चत्यनेनेति विग्रहे ॥ षिचिर् सेचने ॥ इर इत्संज्ञा वाच्या ॥ चोः कु
रिति चस्य कः ॥ मैं पुगन्तलघूपधस्य च ॥ अनेन गुणः ॥ सेक्त्रम् ॥

© Dharmarth Trust. Digitized By eGangotri

मेदुभिति ॥ मेहत्यनेनेति विग्रहे ॥ मिह सेचने सेचनेच ॥ पुगंते ति गुणः ॥ होढः ॥ अनेन हस्य ढः ॥ झषस्तथोर्धो
२ धः ॥ अनेन तस्य धः ॥ ष्टुनाष्टुः ॥ अनेन धस्य ढः ॥ ढोढे लोपः ॥ अनेन पूर्व ढकारस्य लोपः ॥ सुप्रत्यय
२ अतोम् ॥ अमिपूर्वः ॥ मेढ्रम् ॥ पत्रमिति ॥ पतत्यनेनेति विग्रहे ॥ पतॢ पतने ॥ ष्ट्रन् प्रत्यय ॥ पत्रम् ॥
दंष्ट्रेति ॥ दंशत्यनेनयाइति विग्रहे दंश दंशने ॥ व्रश्चभ्रस्जेति शस्य षः ॥ ष्टुनाष्टुः ॥ अनेन तस्य टः ॥
अजादीनां ॥ दंष्ट्र ॥ अजाद्यतष्टाप् ॥ दंष्ट्रा ॥ सुप्रत्यय ॥ हलङ्याब्भ्यो ॥ अनेन लोपः ॥ दंष्ट्रा ॥ इति ॥
नद्ध्रीति ॥ नह्यत्यनया इति विग्रहे ॥ णह बन्धने ॥ णोनः ॥ नह इति जातं ॥ ष्ट्रन् ॥ नहोधः ॥ इति हस्य
धः ॥ झषस्तथोर्धोधः ॥ अनेन तस्य धः ॥ झलांजशझशि ॥ अनेन पूर्व धकारस्य दकारः ॥ षित्
गौरादिभ्यश्च ॥ यस्येति डीष् ॥ अनेन नद्ध्रीश् ॥ सुप्रत्यय सुलोपः ॥ नद्ध्री ॥ इति ॥ अर्तिलूधू वाधि (?) इत्यादि सूत्र
सूखनसहचर इत्रः ॥ एभ्य इत्र प्रत्ययः स्यात् करणेर्थे ॥ अरित्रमिति ॥ ऋच्छति नौकादिकमनेनेति विग्रहे ॥
ऋ गतौ ॥ इत्र प्रत्यय ॥ सार्वधातुकार्धधातुकयोः ॥ अनेन गुणः ॥ सु प्रत्यय ॥ अतोम् ॥ अमिपूर्वः ॥ अरित्रम् ॥
लुनात्यनेनेति विग्रहे ॥ लूञ् छेदने ॥ सार्वधातुकेति गुणः ॥ एचोयवायावः ॥ लवित्रम् ॥ धू विधूनने ॥ कंपने (?)
सार्वधातुकेति गुणः ॥ धवित्रम् ॥ धवत्यनेनेति धवित्रम् ॥ षूङ् प्राणिगर्भविमोचने ॥ धात्वादेषस्सः ॥
सार्वधातुकेति गुणः ॥ सवित्रम् ॥ सौत्यनेनेति सवित्रम् ॥ खनु अवदारणे ॥ इत्र प्रत्ययः ॥ खनित्रम् ॥
खनत्यनेनेति खनित्रम् ॥ षह मर्षणे ॥ धात्वादेषस्सः ॥ इत्र प्रत्ययः ॥ सहत्यनेनेति सहित्रम् ॥
चर गति भक्षणयोः ॥ इत्र प्रत्ययः ॥ चरत्यनेनेति चरित्रम् ॥ पुवः संज्ञायाम् ॥ पू धातोरित्र प्रत्य
यः स्यात् संज्ञायां गम्यमानायां ॥ पूञ् पवने ॥ इत्र प्रत्ययः ॥ सार्वधातुकेति गुणः ॥ पुनात्यनेनेति प
वित्रम् ॥ येनाज्यमुत्पूयते यज्ञानामिकावेष्टनम् ॥ इति पवित्रम् ॥

© Dharmarth Trust. Digitized By eGangotri

अथोणादयः ॥ कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ एभ्य उण् स्यात् ॥ कृञ् करणे ॥ तस्मात् उण् । कृ उ इति जातं ॥ अ
चो ञ्णिति ॥ अनेन वृद्धिः ॥ अकीन ॥ सुप्रत्यय रुत्व विसर्गौ ॥ कारुः ॥ करोतीति कारुः ॥ कारुः शिल्पिनि कारक इति ।
धरणिकोशमभिप्रेत्याह कारुरित्याह ॥ आद्ये योगरूढिः । द्वितीये तु योगमात्रमिति विवेकः ॥ विश्वकर्मणि ना कारु
स्त्रिषु कारकशिल्पिनीति मेदिनीति ॥ अत एव द्वितीये धात्वर्थे प्रतिकारकान्वयो भवति ॥ तथा च भट्टिः ॥ राघा
वस्य ततः कार्य्ये कारुर्वानरपुंगवः सर्ववानरसेनानामाशु आगमनमादिशत् । इति ॥ वा गतिगंधनयोः ॥ उण् । आतो यु
क्चिण्कृतोः ॥ अनेन युक् ॥ वायुः ॥ वातीति वायुः ॥ पा रक्षणे ॥ उण् । युक् ॥ पायुः ॥ पायुर्गुदम् ॥ वै पायुः पुंसि
गुदं त्वपाने पायुर्नेत्यमरः ॥ जायुरिति ॥ जि अभिभवे ॥ तिरस्कारेत्यर्थः ॥ उण् प्रत्ययः ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥
एचोऽयवायावः ॥ अनेन आयादेशः ॥ जायुः ॥ जयत्यभिभवति रोगान् । इति जायुरौषधम् ॥ भैषज्यौषधभैष
ज्यान्यगदो जायुरित्यपीत्यमरः ॥ साहचर्य्यात्तु स्वर्मं ॥ मायुरिति ॥ डुमिञ् प्रक्षेपणे ॥ उण् । अचो ञ्णिति । अ
नेन वृद्धिः । आयादेशः ॥ मायुः ॥ मिनोति प्रक्षिपति देहे । उष्माणमिति मायुः पित्तम् ॥ मायुः पित्तमित्यम
रः ॥ स्वद आस्वादने ॥ उण् ॥ स्वादुः ॥ स्वदते रोचते इति स्वादुः ॥ विशेष्यनिघ्नोऽयम् ॥ एवं साधुरपि साध
संसिद्धौ ॥ उण् ॥ साधुः ॥ साध्नोति परकार्य्यमिति साधुः ॥ आशुमिति । अशूङ् व्याप्तौ संघाते च ॥ अत्र दीर्घऊकारः
स्वरति सूतीत्यनेनेट्विकल्पार्थः ॥ करणे उण् ॥ अत उपधायाः ॥ अनेन वृद्धिः ॥ आशुः ॥ अश्नुते इति आशुः ॥ आशुः
शीघ्रम् ॥ आशुः शीघ्रमिति विलम्बाभावमात्रपरत्वे क्लीबम् ॥ तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गः ॥ अथ शीघ्रमित्यु
पक्रम्य क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां मेद्यगामि यदित्यमरः ॥ उणादयो बहुलम् ॥ एतेषु वर्तमाने संज्ञायां च बहुलं
स्युः ॥ केचिदविहिता अप्यूह्याः ॥ संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्याद्विद्यादनूबन्धमेतच्छा
स्त्रमुणादिषु ॥ इति चन्द्रसम्मतिः ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ॥ क्रियार्थायां क्रियायामुपपदे भविष्य
त्यर्थे धातोरेतौ स्तः ॥ मान्तत्वादव्ययत्वम् ॥ दृशिर् प्रेक्षणे ॥ तुमुन् प्रत्ययः ॥ दृश् तुम् इति जाते ॥ सृजिदृशोर्झल्यम
बहुलग्रहणस्य फलमाह । केचिदिति ॥

© Dharmarth Trust. Digitized By eGangotri

अनयोरमागमः स्यात्झलादावकिति ॥ छि ॥ अनेन अम् ॥ द्र अश् तुम् ॥ इकोयणचि ॥ अनेन यण् ॥ द्रश् तुम् ॥ व्रश्च
३ भ्रस्जेति षत्वं ॥ ष्टुना ष्टुः ॥ अनेन तस्य टः ॥ द्रष्टुम् ॥ इति ॥ सुप्रत्यय ॥ कृन्मेजन्तः ॥ कृद्यो मान्त एजन्त अवतदन्तम
व्ययं स्यात् ॥ अनेन अव्ययसंज्ञा ॥ अव्ययादाप्सुपः ॥ अव्ययादि हितस्य आपस्य सुपश्च लुक् स्यात् ॥ अनेन सुपस्य
लुक् ॥ कं द्रष्टुं याति ॥ किं द्रष्टुं याति ॥ इत्यापेक्षायां ॥ कृष्णं द्रष्टुं याति ॥ अव्ययकृतोभावे इति भाष्यकारकैवच
नात् ॥ तुमुन् भावे ॥ दृश्यते इति द्रष्टुम् ॥ एवं ॥ दृशिर् प्रेक्षणे ॥ दृश् इत्संज्ञा वाच्या ॥ ण्वुल् प्रत्ययः ॥ दृश् वु
इति जाते ॥ युवोरनाकौ ॥ अनेन वुस्थाने अक आदेशः ॥ दृश् अक इति जाते ॥ पुगन्तेति गुणः ॥ दर् श् अक
अकीन ॥ सुप्रत्यय रुत्वविसर्गौ ॥ दर्शकः ॥ अथ कर्त्तरि कृदिति कर्त्तरि ण्वुल् ॥ द्रक्ष्यतीति दर्शकः ॥ कृष्णं
न्दर्शको याति ॥ कालसमयवेलासु तुमुन् ॥ कालसमयवेलासु वाच्यासु तुमुन् प्रत्ययः स्यात् ॥ भुज पालनाभ्य
वहारे च ॥ तुमुन् प्रत्ययः ॥ भुज् तुम् इति जाते ॥ पुगन्तेति गुणः ॥ भोज् तुम् इति जाते ॥ चोः कुः ॥ अनेन
जस्य गः ॥ खरि चेति गस्य कः ॥ भोक् तुम् ॥ अकीन । भोक्तुम् । सुप्रत्यय ॥ अव्ययादाप्सुपः ॥ अनेन लुक् ॥
अत्र तु भावे प्रत्ययः ॥ भोक्ष्यते इति भोक्तुम् ॥ कालः वा समयः वा वेला भोक्तुम् ॥ कालः समयो वेला वा भोक्तुम् ॥
॥ भावे ३।३।१८ सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात् ॥ साध्यरूपा क्रिया तत्र धातुरूप निबन्धना । सिद्धभावस्तुय
स्त्याः सघञादि निबन्धन इति हर्य्युक्त मनुसृत्याह सिद्धेति ॥ अथ कारिका ॥ क्रियायाः सिद्धतावस्थोऽस्याः सा
साध्यतम् ॥ क्रियान्तरे त्यावकताव च्छेदत्वे सिद्धत्वं ॥ भावो द्विविधः सिद्धावस्थापन्नः । साध्यावस्थापन्नः ॥
ध्यावस्था विकीर्षिता सिद्धतां द्रव्य भिक्षंति तत्रैव कुर्वन्ति घञ् विधिं ॥ इति ॥ क्रियान्तरान्वयोचकतावच्छेदकत्वे
सिद्धावस्थापन्नः भावो द्रव्यभिक्षंति ॥ कृदभिहितो भावो द्रव्यवत्प्रकाशते ॥ इति ॥ डुपचष् पाके ॥ अस्मात्प्रत्ययमा
वे घञ् ॥ घकारञकारस्य इत्संज्ञायां लोपः ॥ पच् अ इति जाते ॥ अत उपधायाः ॥ अनेन वृद्धिः ॥ चोः कुः ॥ अनेन चस्य
कः ॥ सुप्रत्ययरुत्वविसर्गौ ॥ पाकः । पाकौ । पाकाः इत्यादि ॥ पचनं पाकः ॥ अकर्त्तरि च कारके संज्ञायाम् ॥

© Dharmarth Trust. Digitized By eGangotri

रागो रंगः ॥ ५०२ इ=२ वजोः कुंधि ण्यतोः ॥ अनेन जः॥=

कर्तृभिन्ने कारके वाच्ये सति धातोः घञ् स्यात् संज्ञायां गम्यमानायां ॥ घञि च भावकरणयोः ॥ घञि परतः रंजेर् नलोपः स्या
त् भावकरणयोः ॥ रंज रागे ॥ अस्मात् भावे इति सूत्रेण भावे घञ् अकर्तरि चेति सूत्रेण करणे घञ् ॥ रञ्ज् अ इति जाते ॥ ॥
नः स्यात् ॥ घञि च भावकरणयोः । अनेन नस्य लोपः ॥ अत्र अनुस्वारस्य यि परसवर्णः ॥ अनेन परसवर्णः स्यात् ॥ अर्थात् प्रथमन
कारका अनुस्वार या ङसका परसवर्ण होयेयाथ्या । सोऽत्र निमित्तापाये नैमित्तिकस्याप्यपायः इति न्यायेन नस्य लोपः ॥ रज्
रज् अ इति जाते ॥ अत उपधायाः ॥ अनेन वृद्धिः ॥ [struck through] राज् अ ॥ सु प्रत्यय रुत्व विसर्गौ ॥ रागः ॥ रागौ रागाः ॥ इत्यादि ॥
भावे तु रंजनं रागः ॥ करणे तु रज्यतेऽनेनेति रागः ॥ अनयोः किम् । अर्थात् भावकरणयोः किम् ॥ रज्यत्यस्मिन्निति रङ्गः ॥
अत्र अकर्तरि चेति सूत्रेण अधिकरणे घञ् ॥ अत्र नकारलोपो न भविष्यति ॥ रंज धातोः अधिकरणे घञ् ॥ चजोः कुंधि
ण्यतोः ॥ अनेन सूत्रेण जस्य गः । सु प्रत्यय रुत्व विसर्गौ ॥ रङ्गः रङ्गौ इत्यादि ॥ निवास चिति शरीरोपसमाधानेष्वादेश्च कः ॥
एष्वर्थेषु वाच्येषु चिनोतेर्नाम चि धातोः घञ् स्यात् ॥ आदेश्च कः स्यात् ॥ उपसमाधानं राशीकरणं ॥ निपूर्वक चि
घञ्= ञ् चयने ॥ अस्मात् निवासेति सूत्रेण निवासार्थे घञ् प्रत्ययः । आदेश्च कः ॥ नि कि अ इति जाते ॥ अचो ञ्णितीत्यनेन वृद्धिः ॥ आ
यादेशः ॥ सु प्रत्यय रुत्व विसर्गौ ॥ निकायः ॥ अत्र तु अधिकरणे घञ् ॥ निचिन्वन्त्यस्मिन्निति निकायः ॥ आकायः ॥ अत्र
आङ् पूर्वक चि धातोः घञ् । चितिर्नाम चयनेऽर्थे ॥ आचीयते ऽस्मिन्निष्टकादिक इति आकायः ॥ कायः ॥ अत्र शरी
रेऽर्थे चि धातोः घञ् ॥ चीयतेऽस्मिन्नस्थ्यादिकमिति कायः ॥ गोमय निकायः । अत्र उपसमाधानेऽर्थे चि धातोः घञ्
॥ अत्र तु भावे घञ् निचयनं निकायः । गोमयानां निकायः गोमयनिकाय इति प निपूर्वक=
ष्टीतत्पुरुषः ॥ एरच् ॥ इवर्णान्ताद्धातोरच् स्यात् ॥ चिञ् चयने । तस्मात् अच् प्रत्ययः ॥ चि अ इति जा
ते ॥ सार्वधातुकार्द्धधातुकयोः । अनेन गुणः ॥ चे अ इति जाते । अयादेशः सु प्रत्यय रुत्व विसर्गौ ॥ चयः ॥ चय
नमिति चयः ॥ एवं जि जये ॥ जयः ॥ जयनं जयः ॥ ऋदोरप् ॥ ऋवर्णान्तात् उवर्णान्ताद्धातोः अप् स्यात्
डुकृञ् करणे तस्मात् भावे अप् ॥ कृ अ इति जाते ॥ अत्र सार्वधातुकेति सूत्रेण गुणः रपरस्तु प्रत्यय रुत्व विस
र्गौ ॥ करः ॥ करणं करः ॥ एवं गृ निगरणे ॥ गरणं गरः ॥ युमिश्रणामिश्रणयोः ॥ सार्वधातुकेति सूत्रेण
गुणः । अवादेशः ॥ यवः । यवनं यवः ॥ एवं लूञ् छेदने लवः ॥ लवनं लवः ॥ ष्टुञ् स्तुतौ एवं ॥ स्तवनं स्तवः ॥

5 औघ त्स पुः ॥

© Dharmarth Trust. Digitized By eGangotri

४

एवं पूत्र पवने ॥ पवनं पवः ॥ घञर्थे क विधानं भवति ॥ प्र पूर्वक ष्ठा गतिनिवृत्तौ ॥ तस्मात् क प्रत्ययः ॥ प्रस्थ अक इति ॥ आतो
लोप इटि च ॥ अनेन आकारस्य लोपः ॥ सुप्रत्यय रुत्व विसर्गौ ॥ प्रस्थः ॥ प्रस्थानं प्रस्थः ॥ वि पूर्वक हन् हिंसागत्योः ॥
तस्मात् क प्रत्ययः ॥ वि हन् क ॥ गमहनजनखनघसां लोपः क्ङित्यनङि ॥ अनेन उपधा अकारस्य लोपः ॥ विहन् अ ।
हो हन्तेर्ञ्णिन्नेषु ॥ अनेन हस्य घः ॥ विघ्न् अ । सुप्रत्यय रुत्व विसर्गौ विघ्नः इति ॥ विशेषेण हननं विघ्नः ॥
ड्वितः क्त्रिः ॥ डु इत्संज्ञकाद्धातोः क्त्रि प्रत्ययः स्यात् ॥ क्त्रेर्मम्नित्यम् ४।४।२० ॥ क्त्रि प्रत्ययान्तात् मप् निर्वृत्तेऽर्थे ॥
डु पचष् पाके ॥ तस्मात् क्त्रि प्रत्ययः ॥ पच् त्रि इति जाते । अस्मात् मप् ॥ पच् त्रिम ॥ चोः कुः ॥ अनेन
कुत्व ॥ सुप्र० अतो [illegible] म ॥ पक्त्रिमम् ॥ पाकेन निर्वृत्तम् पक्त्रिमम् ॥ डु वप् बीजसंताने ॥ अत्र वचिस्व
पियजादीनां किति ॥ संप्रसारणं अकारस्य पूर्वरूपः ॥ संप्रसारणाच्चेति सूत्रेण ॥ अन्य पूर्ववत् ॥ उप्त्रिम
म् ॥ वापेन निर्वृत्तम् उप्त्रिमम् ॥ ट्वितोऽथुच् ॥ टु इत्संज्ञकाद्धातोः अथुच् प्रत्ययः स्यात् ॥ अयमपि स्वभा
वात् भाव एव ॥ टु वेपृ कम्पने ॥ तस्मात् अथुच् ॥ वेप् अथु ॥ सुप्र० रुत्व विसर्गौ ॥ वेपथुः ॥ वेपनं
वेपथुः ॥ एवं श्वयथुः ॥ टु ओ श्वि गतिवृद्ध्योः ॥ गुण अयादेशः ॥ श्वयनं श्वयथुः ॥ यजयाचयतविच्छप्रच्छरक्षो
नङ् ॥ एभ्यो नङ् स्यात् ॥ यज देवपूजासंगतिकरणदानेषु ॥ यज धातो नङ् । यज् न ॥ स्तोः श्चुना श्चुः ॥ अनेन
नस्य ञ ॥ ज ञ ज्ञ ॥ सुप्रत्यय रुत्व विसर्गौ ॥ यज्ञः ॥ यजनं यज्ञः ॥ टु याचृ याचने ॥ अस्मात् नङ् ॥ याच् न ॥
स्तोः श्चुना श्चुः ॥ स्त्रीत्वविवक्षायां ॥ टाप् ॥ याच्ञा ॥ सुलोपः हल्ङ्याब्भ्य इति सूत्रेण ॥ याचनं याच्ञा ॥ यती प्रयत्ने ॥
नङ् प्रत्ययः ॥ यत् न । रुत्व विसर्गौ ॥ यत्नः ॥ यतनं यत्नः ॥ विच्छ गतौ ॥ नङ् । विच्छ् न इति जाते ॥ च्छ्वोः
शूडनुनासिके च ॥ सतुक्कस्य छस्य वस्य च श ऊठ् एतावादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति ॥ अनेन छ
स्य शः ॥ सुप्रत्यय रुत्व विसर्गौ ॥ विशनं विश्नः ॥ प्रच्छ ज्ञीप्सायां ॥ ज्ञातुम् इच्छा ज्ञीप्सा तस्यां ॥
ज्ञीप्सायां ॥ तस्मात् नङ् । च्छ्वोः शूडनुनासिके च ॥ अनेन छस्य शः ॥ रुत्व विसर्गौ ॥ प्रश्न प्रश्नः ॥
रक्ष रक्षणे वा पालने ॥ नङ् । रक्ष् न ॥ रषाभ्यां नो णः समानपदे ॥ अनेन नस्य णः ॥ रक्ष्णः ॥ रक्ष्णं
॥ तस्मात् [illegible] ॥ प्रमादात् तन्त्रकाले इति ज्ञापकात् गृह्य[illegible]संप्रसारणम् ॥ ४

स्वप्नोनन् ॥ स्वप धातोः नन् प्रत्ययः स्यात् ॥ ञिष्वप् शये ॥ धात्वादेः षः सः ॥ तस्मात् नन् प्रत्ययः ॥ स्वप्न इति
जाते । अजकीन ॥ स्वप्न स्वप्नः ॥ उपसर्गे घोः किः ॥ उपसर्गे पूर्वपदे सति घु संज्ञकाद्धातोः कि प्रत्ययः स्यात् ॥
प्र पूर्वक डु धाञ् धारण पोषणयोः ॥ तस्मात् कि ॥ प्र धा इ ॥ इति जाते ॥ आतो लोप इटि च ॥ अनेन आ
कारस्य लोपः ॥ प्रध इ ॥ रुत्व विसर्गौ ॥ प्रधिः ॥ प्रकर्षेण धानं प्रधिः ॥ उप आङ् पूर्वक डु धाञ्
धारणपोषणयोः ॥ अस्य तु उपाधिः ॥ उपाधीयते ऽनेनेति उपाधिः ॥ समीपे स्वधर्ममादधातीत्युपा
धिः ॥ बाहुलकात् कर्त्तरि किरिति ॥ स्त्रियां क्तिन् ॥ स्त्रीलिङ्गे भावादौ क्तिन् स्यात् ॥ घञोऽपवादः ॥
डु कृञ् करणे ॥ क्तिन् प्रत्ययः ॥ कृतिः ॥ करणं कृतिः ॥ ष्टुञ् स्तुतौ । एवं स्तवनं स्तुतिः ॥ ऋ
ल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः ॥ तेन नत्वम् ॥ कॄ विक्षेपे ॥ क्तिन् प्रत्ययः ॥ ॠत इद्धातोः ॥ अने
न इत्वं ॥ रपर ॥ हलि च ॥ अनेन दीर्घः ॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥ अनेन तस्य नः ॥ रषाभ्यां
नो णः समानपदे ॥ अनेन नस्य णः ॥ कीर्णिः ॥ करणं कीर्णिः ॥ एवं गॄ निगरणे ॥ गरणं गीर्णिः ॥ 
एवं लूञ् छेदने ॥ अग तु ल्वादिभ्यः ॥ अनेन निष्ठातस्य नः ॥ लवनं लूनिः ॥ एवं धूञ् कंपने ॥
धवनं धूनिः ॥ एवं पूञ् पवने । पवनं पूनिः ॥ सम्पदादिभ्यः क्विप् ॥ सम पूर्वक पद्ऌ पतने ॥
तस्मात् क्विप् ॥ क्विपः सर्वापहारि लोपः ॥ स्तु प्रत्यय ॥ हलङ्याब्भ्य इति सूत्रेण सुलोपः ॥ संपतनं सम्पत् ॥
एवं वि पूर्वक पद्ऌ पतने ॥ विपतनं विपत् ॥ आङ् पूर्वक पद्ऌ पतने ॥ आपतनं आपत् ॥ क्तिन्नपीष्यते ॥ इति भाष्यवचनात् ॥ सम पूर्वक पद्ऌ पतने ॥ तस्मात् क्तिन् ॥ संपतनं सम्पत्तिः ॥ एवं वि
पूर्वकात् क्तिन् ॥ विपतनं विपत्तिः ॥ एवं आपतनं आपत्तिः ॥ ऊतियूतिजूतिसातिहेतिकीर्त
यश्च ॥ एते शब्दाः निपात्यंते ॥ ज्वर त्वर स्त्रिव्यविमवामुपधायाश्च ॥ एषामुपधावकारयोरूठनु
धातुना =

© Dharmarth Trust. Digitized By eGangotri

इकारस्य करणे ॥ अत्र दीर्घं निपात्यते = ६ तः=

अवरक्षणे ॥ तस्मात् क्तिन् प्रत्ययः ॥ अव् ति इति जाते ॥ ज्वरत्वरे ति शास्त्रेण ऊठ् ॥ ऊ ति । सुप्रत्यय रुत्व विसर्गौ
ऊतिः ॥ वैअवनं ऊतिः ॥ अग स्वरार्थ वचनम् निपात्यते ॥ उदात्त इति हि वर्त्तते ॥ यू मिश्रणे मिश्रणयोः । जु गतौ
५ ॥ अनयोः क्तिन् ॥ सुप्र० । रुत्व विसर्गौ ॥ यूतिः । जूतिः ॥ अनयोर् दीर्घत्वं च निपात्यते ॥ यवने यूतिः जवने जूतिः ॥
5 षो अन्तकर्मणि ॥ धात्वादेः षः सः ॥ क्तिन् प्र० सा ति इति जाते ॥ आदेच उपदेशे ऽशिति ॥ अनेन आत्व ॥ सातिः ॥
अत्र द्यतिस्यति मास्थामिति प्राप्तस्येत्त्वस्य अभावो निपात्यते ॥ हन् हिंसागत्योः ॥ अस्मात् क्तिन् प्र० ॥ हन् ति इति जातं ।
अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिक लोपो झलि क्ङिति ॥ अनेन नस्य लोपः ॥ एतेन निपातनात् ॥
हेतिः ॥ हननं हेतिः ॥ कृ विक्षेपे ॥ ऋत इद्धातोः ॥ अनेन ऋकारस्य इत् ॥ रपर ॥ हलि च इति दीर्घः ॥ क्ति
न् प्रत्यये पूर्ववत् भवति ॥ कीर्त्तिः ॥ अचो रहाभ्यामिति द्वित्वं ॥ करणे कीर्त्तिः ॥ ज्वर त्वर स्रिव्यविमवामुप
धायाश्च ॥ एषामुपधावकारयोः ऊठ् क्वौ झलादावनुनासिकादौ च प्रत्यये ॥ अत्र क्ङिती ति नानुवर्तते
अवतेस्तु निकृते ऊतुरिति दर्शनात् ॥ ज्वर रोगे ॥ तस्मात् ॥ क्विप् च ॥ अनेन क्विप् ॥ क्विप् सर्वापहारि
लोपे कृते । ज्वर् इति जातं ॥ ज्वरत्वरेति ऊठ् ॥ जूर् सुप्र० हल्ङ्याब्भ्य इति लोपः ॥ रेफस्य विसर्गः ॥
जूः ॥ अग कर्त्तरि प्रत्ययः ॥ ज्वरतीति जूः ॥ एवं स्रिवु गतिशोषणयोः ॥ क्विप् । लोपः । स्रिव् इति जा
तं ॥ ऊठ् । रुत्व विसर्गौ ॥ स्रूः ॥ स्रिव्यतीति स्रूः ॥ कर्त्तरि प्रत्ययः ॥ ञि त्वरा संभ्रमे ॥ क्विप् । लोपः । त्वर्
इति जाते ॥ ऊठ् ॥ तूर् ॥ हल्ङ्याब्भ्य इति सु लोपः ॥ रेफस्य विसर्गः ॥ तूः ॥ त्वरते इति तूः । कर्त्तरि प्र० ॥
एवं अव रक्षणे ॥ क्विप् । लोपः । ऊठ् । सुप्र० रुत्व विसर्गौ ऊः ॥ अवतीति ऊः ॥ कर्त्तरि प्रत्ययः ॥ मव
बंधने ॥ क्विप् । लोपः ॥ ऊठ् । सुप्र० । रुत्व विसर्गौ ॥ मूः ॥ मवतीति मूः ॥ कर्त्तरि प्रत्ययः ॥ इच्छा ॥
इषेर्निपातोयम् ॥ इषु धातो इच्छा इति प्रयोगः निपातनात् सिद्धं भवति ॥ इषेर्भावे शः यग भावश्च नि
पात्यते ॥ इषु इच्छायां ॥ भावे शः । इष् श । इष् अ इति जातं ॥ इषुगमियमां छः ॥ अनेन षस्य छः ॥
छे च ॥ अनेन तुक् ॥ स्तोः श्चुना श्चुः ॥ अनेन तस्य चः ॥ स्त्रीत्व विवक्षायां टाप् ॥ इच्छा ॥ हल्ङ्याब्भ्य इति सु लोपः
एषणं इच्छा ॥ अप्रत्ययात् ॥ प्रत्ययान्ते भ्यो धातुभ्य अकार प्रत्ययः स्यात् ॥ चिकीर्षेति पूर्ववत् सिद्धं कृतं
डुकृञ् करणे तस्य = १

CC-0. Dharmarth Trust. Digitized By eGangotri

अप्रत्ययात् । अनेन अप्रत्ययः अतो गुणे अनेन पररूपः = इवं गु                                                                 सुलोपः = १

तस्मात् स्त्रीत्वविवक्षायां ॥ अप्रत्ययात् ॥ अनेन अप्रत्ययः ॥ चिकीर्ष अ ॥ अतो गुणे ॥ चिकीर्ष ॥ अजाद्यतष्टाप् ॥ अनेन टाप् ॥ चिकीर्षा ॥
कर्तुमिच्छति चिकीर्षति चिकीर्षतीति चिकीर्षा ॥ पुत्रं इति द्वितीयांतात् ॥ काम्यच्च ॥ अनेन काम्यच् प्रत्ययः । पुत्रंकाम्य इति जातं ॥ सनाद्यं
ता धातवः ॥ अनेन धातुसंज्ञा ॥ सुपो धातुप्रातिपदिकयोः । अनेन हि सुपः लुक् ॥ पुत्रकाम्य इति जाते ॥ स्त्रीत्वविवक्षायां टाप् ॥ पुत्रकाम्या ॥
आत्मनः पुत्रमिच्छति इति पुत्रकाम्यति । पुत्रकाम्यतीति पुत्रकाम्या ॥ गुरोश्च हलः ॥ गुरुमतो हलन्तात् स्त्रियाम् अकारप्रत्ययः स्यात् ॥ ईह चे
ष्टायाम् ॥ तस्मात् गुरोश्च हलः अनेन अप्रत्ययः ॥ स्त्रीत्वविवक्षायां टाप् । सुलोपः ॥ ईहनं ईहा ॥ ण्यासश्रन्थो युच् ॥ णिजंता आसश्रन्थो
धातुभ्यः युच् प्रत्ययः स्यात् ॥ अकारस्यापवादः ॥ डुकृञ् करणे ॥ तस्मात् हेतुमति च अनेन प्रेरके णिच् ॥ अचो ञ्णिति इति वृद्धिः ॥ का
रि ॥ इति जाते ॥ सनाद्यंता इति धातुसंज्ञा ॥ के ण्यासश्रन्थो इति युच् ॥ युवोरनाकौ ॥ अनेन युस्थाने अन आदेशः ॥ कारि अन इति ॥
णेरनिटि ॥ अनेन णिलोपः ॥ कार् अन इति ॥ अट्कुप्वाङ्नुम्व्यवायेऽपि णत्वं ॥ स्त्रीत्वे वाच्ये टाप् ॥ करणं कारणा ॥ सुलोपः ॥ एवं हृञ् हरणे
हरणं हारणा इति ॥ नपुंसके भावे क्तः ॥ नपुंसके वाच्ये सति भावे क्त प्रत्ययः स्यात् ॥ हस हसने ॥ तस्मात् क्त प्रत्ययः ॥ हस् त इ
ति जाते ॥ आर्धधातुकस्येड्वलादेः ॥ अनेन इट् ॥ हसित इति जातं ॥ सुप्र० अतोम् ॥ हासः हसितम् ॥ ल्युट् च ॥ नपुंसके वाच्ये भावे
ल्युट् प्रत्ययः स्यात् ॥ हस धातोः ल्युट् ॥ युवोरनाकौ । अनेन युस्थाने अन ॥ हस् अन इति ॥ सुप्र० । अतोम् ॥ हासः हसनम् ॥
पुंसि संज्ञायां घः प्रायेण ॥ प्रायेण नाम बाहुल्येन पुंसि वाच्ये सति संज्ञायां गम्यमानायां धातोः घः प्रत्ययः स्यात् ॥ छादेर्घेऽद्व्युपसर्गस्य ॥
द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद् घे ॥ छद अपवारणे । अपवारणं आच्छादनं ॥ छद धातोः सत्यापपाशेति स्वार्थे णिच् ॥ छद् इ इति
जाते ॥ अत उपधायाः ॥ अनेन वृद्धिः ॥ छादि इति जातं ॥ पुंसि संज्ञाये इति घः प्रत्ययः ॥ छादि अ इति जातं ॥ णेरनिटि । अनेन णि
लोपः ॥ छाद इति । छादेर्घे इति सूत्रेण ह्रस्वः । सुप्रत्यये ॥ छद इति जातं ॥ दंताः छद ॥ [illegible] सह सुपा । अनेन समासः
समासत्वात् सुपो लुक् ॥ दंतछद ॥ सुप्रत्यये रुत्वविसर्गौ ॥ दंतछदः ॥ अगकरणे प्रत्ययः ॥ दंता छाद्यंते अनेन इति दंतछद ॥
आङ्पूर्वक कृञ् धातोः । पुंसि संज्ञायां इति घः प्रत्ययः ॥ आ कृ अ इति । सार्वधातुके ति गुणः ॥ सुप्र० रुत्वविसर्गौ ॥ आकरः ॥

© Dharmarth Trust. Digitized By eGangotri

करणाधिकरणयोः=३

६ आकुर्वन्त्यस्मिन्निति आकरः ॥ अत्राधिकरणे प्रत्ययः ॥ अत्र आङ् उपसर्गस्य उत्पत्त्यर्थः ॥ आसमन्तात् संकुर्वन्ति नाम उत्पन्नं कुर्वन्ति येता
आदिकं अस्मिन्निति आकरः ॥ एकः तस्य भाषायां खान इति कथनं ॥ अवे तॄस्त्रोर्घञ् ॥ अवात् तॄस्त्रोः पंचम्यर्थे षष्ठी ॥ अव उप
सर्गे पूर्वपदे सति तॄस्तॄ धातुभ्यां घञ् प्रत्ययः स्यात् ॥ तॄ प्लवनसंतरणयोः ॥ अव पूर्वक तॄ धातोः तस्मात् घञ् प्रत्ययः ॥ अव तॄ अ इति ॥
अचो ञ्णिति ॥ अनेन वृद्धिः ॥ सुप्रत्यय रुत्व विसर्गौ ॥ अवतारः ॥ अत्राधिकरणे प्रत्ययः ॥ अवतरंत्यस्मिन्निति अवतारः ॥ अव
तारः कूपादेः ॥ एवं स्तृञ् आच्छादने ॥ तस्मात् । अवे तॄस्त्रोः • इति घञ् ॥ स्तृ अ इति जाते ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥ सु
प्रत्यय रुत्व विसर्गौ ॥ अवस्तारः ॥ अत्र करणे प्रत्ययः ॥ अवस्तृणात्यनेन इति अवस्तारः ॥ अवस्तारो जवनिका ॥
हलश्च ॥ हलन्तो धातोः घञ् प्रत्ययः स्यात् करणाधिकरणयोः ॥ घोषवर्णादेः ॥ रमु क्रीडायां ॥ तस्मात् घञ् ॥ रम् अ इति जाते ॥
अत उपधायाः ॥ अनेन वृद्धिः ॥ सुप्रत्यय रुत्व विसर्गौ ॥ रामः ॥ रमन्ते योगिनो यस्मिन्निति रामः ॥ अत्राधिकरणे घञ् प्रत्ययः ॥
एवं मृजूष् शुद्धौ ॥ तस्मात् घञ् ॥ मृज् अ इति जाते ॥ मृजेर्वृद्धिः ॥ मृजेरिको वृद्धिः स्यात्तु सुञार्य्य विहित प्रत्यये परतः ॥ अ
नेन वृद्धिः ॥ मार्ज् अ इति जाते ॥ चजोः कु घिण्यतोः ॥ चकार जकारयोः कुत्वं स्यात् घिति ण्यति च परतः ॥ अनेन कुत्वं ॥ अ
पामार्ग ॥ सुप्रत्यय रुत्व विसर्गौ ॥ अपामार्गः ॥ अत्र करणे प्रत्ययः ॥ अपमृज्यते व्याध्यादिः अनेनेत्यपामार्गः ॥ ईषद्दुःसुषु कृच्छ्रा
कृच्छ्रार्थेषु खल् ॥ एषु दुःख सुखार्थेषु उपपदेषु खल् ॥ तयोरेवेति भावे कर्म्मणि च ॥ कृञ् उदाहरणमाह ॥ ये दुष्करः कटो
भवता ॥ भवता कटः दुष्करः ॥ अत्र कट शब्दस्य उक्तित्वात् प्रथमास्ति ॥ तेने कट जो है सो दुष्कर के करीदा है ॥ अब कृञ् उदा
हरणमाह ॥ ईषत्करः कटो भवता ॥ तेने कट जो है सो ईषत्करः ॥ नाम सुखकर के करीदा है ॥ सुकरः प्रपंचो हरिणा ॥
हरीनें प्रपंच जो है सो सुकरः नाम सुखकर के करीदा है ॥ अत्र ईषत् और दुस् और सु इन्हों के उपपद होसते कृ धातोः
खल् ॥ सार्वधातुके तिङ्गुणः ॥ अत्र सकर्म्मणि प्रत्ययः ॥ कृतः सकर्म्मकत्वात् ॥ दुष्करः ॥ ईषत्करः ॥ सुकरः इत्यादि ॥
=अत्र दीर्घ ऊकारः स्वरविशती... इकत्वार्थे=६

अवपूर्वके =५॥ अपपूर्वाङ्पूर्वके =

© Dharmarth Trust. Digitized By eGangotri

एवं दिवु क्रीडाविजिगीषादि० ॥ तस्मात् पूर्वकाले क्त्वा ॥ दिव् त्वा ॥ उदितो वा ॥ अनेन पक्षे इट् ॥ पुगंतलघूपधस्य च ॥ अनेन गुणः
देवित्वा ॥ इति ॥ यस्मिन् पक्षे इट् न भवति तस्मिन् पक्षे तु दिव् त्वा ॥ अस्यां चावस्थायां ॥ छ्वोः शूड् अनुनासिके च ॥ अनेन वस्य ऊ
ठ् ॥ इको यणचि ॥ अनेन यणादेशः ॥ द्यूत्वा ॥ इति ॥ अत्र कित्वात् गुणनिषेधः ॥ डुधाञ् धारणपोषणयोः ॥ अस्मात्
पूर्वकाले क्त्वा ॥ धा त्वा इति जाते ॥ दधातेर्हिः ॥ अनेन धा इत्यस्य स्थाने हि आदेशः ॥ हित्वा ॥ इति ॥ जहातेश्च ॥ ओहा
क् त्यागे ॥ तस्मात् पूर्वकाले क्त्वा ॥ हा त्वा इति जाते ॥ जहातेश्च ॥ अनेन हा इत्यस्य स्थाने हि आदेशः ॥ हित्वा इति सिद्धं ॥
एवं ओहाङ् गतौ ॥ तस्मात् पूर्वकाले क्त्वा ॥ हात्वा इति सिद्धं ॥ हाङ् तु हात्वा ॥ समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥
अव्ययपूर्वपदे नञ्समासे क्त्वो ल्यबादेशः स्यात् ॥ प्र इत्यव्ययं ॥ कृ धातोः तस्मात् पूर्वकाले क्त्वा ॥ प्र कृ त्वा इति जा
ते ॥ अत्र पूर्वसूत्रेण क्त्वा इत्यस्य स्थाने ल्यप् आदेशः ॥ प्र कृ य इति जाते ॥ ह्रस्वस्य पिति कृति तुक् ॥ अनेन तुक् आ
गमः ॥ प्रकृत् य ॥ प्रकृत्य इति सिद्धं ॥ अनञ् किम् ॥ सूत्रे अनञ् ग्रहणं किमर्थं ॥ यदा अनञ् ग्रहणं न स्यात् तदा
अकृत्वा इत्यत्र ल्यबादेशः स्यात् अकृत्य एवं स्यात् ततु अकृत्वा ॥ इति ॥ सिद्धं तेतु अकृत्वा इति प्रयोगो भवति ॥
अत्र नञ्समासः ॥ न कृत्वा अकृत्वा ॥ आभीक्ष्ण्ये णमुल् च ॥ आभीक्ष्ण्ये द्योत्ये पूर्वविषये नाम पूर्वकाले विद्यमा
नाद्धातोः णमुल् प्रत्ययः स्यात् क्त्वा च ॥ आभीक्ष्ण्यं पौनःपुन्यं ॥ स्मृ चिन्तायाम् ॥ तस्मात् पूर्वकाले णमुल् ॥ चुटू
त्र= अनेन णकारस्य संज्ञा ॥ स्मृ अम् इति जाते ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥ स्मारम् ॥ कृदन्तात्त्वोत्वा तिवैदिकसंज्ञा
सुप्रत्यय ॥ कृन्मेजन्तः ॥ अनेन शास्त्रेण अव्ययसंज्ञा ॥ अव्ययादाप्सुपः ॥ अनेन सुपस्य लुक् ॥ स्मारम् इति जाते ॥ नि
त्यवीप्सयोः ॥ आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात् ॥ व्याप्तुमिच्छा वीप्सा तस्यां वीप्सायां ॥ वीप्सा तु
एकत्ववाचकशब्दः सूत्रे वीप्सयोः इति सप्तमी द्विवचनं कथं ॥ अस्मात् किं सिद्धं आभीक्ष्ण्याया नुरत्यर्थे वीप्सया
इति ॥ अनेन स्मारम् इति पदस्य द्वित्वं ॥ स्मारम् स्मारम् इति ॥ देवदत्तः स्मारम् स्मारम् नमति शिवम् ॥
एवं स्मृ चिन्तायां ॥ तस्मात् आभीक्ष्ण्ये णमुल् च ॥ अनेन क्त्वा प्रत्ययः ॥ स्मृ त्वा स्मृत्वा इति ॥ पा पाने ॥
अस्मात् पूर्वकाले णमुल् ॥ आतो युक् चिण्कृतोः ॥ अनेन युगागमः ॥ पायम् पायम् इति ॥ भुज पालना
भ्यवहारयोः ॥ अभ्यवहारं भक्षणं ॥ तस्मात् पूर्वकाले णमुल् ॥ पुगन्तलघूपधस्येति गुणः ॥ भोजम् भोजम् इति ॥
श्रु श्रवणे ॥ तस्मात् पूर्वकाले णमुल् ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥ आवादेशः ॥ श्रावम् द्वित्वम् श्रावम्

© Dharmarth Trust. Digitized By eGangotri

८

देवदत्तः स्मृत्वा स्मृत्वा पायम् पायम् भोजम् भोजम् श्रावम् श्रावम् नमति शिवम् ॥ आभीक्ष्ण्ये तिङन्ते प्रत्ययसंज्ञेषु कृ
दन्तेषु ॥ तिङन्तेषूदाहरणमाह ॥ पचति पचति नमति नमति शिवम् ॥ अन्यथैवं कथमि
त्थंसु सिद्धाप्रयोगश्चेत् ॥ एवं पदेषु कृञो
४ णमुल् स्यात् ॥ सिद्धोऽप्रयोगो यस्य स
सिद्धाप्रयोगः ॥ एवम्भूतश्चेत् कृ
ञो व्यर्थत्वात्प्रयोगानर्ह इत्य
र्थः ॥ प्रयोगस्य अनर्हः प्रयोगानर्हः ॥ अन्यथापूर्वक कृधातोः णमुल्प्रत्ययः ॥ अन्यथा तस्मात्पूर्वकाले
कृ अम् इति जातं ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥ अन्यथाकारम् ॥ अन्येन प्रकारेण इति
इ अन्यथा ॥ एवंकारम् भुङ्क्ते ॥ कथङ्कारम् भुङ्क्ते ॥ केन प्रकारेण इति कथं ॥ इत्थंकारं
भुङ्क्ते ॥ अनेन प्रकारेण इति इत्थं ॥ सिद्धेति किम् ॥ एते सिद्धप्रहणं किमर्थं ॥
शिरोऽन्यथा कृत्वा भुङ्क्ते ॥ अत्र तु कृधातोः सार्थत्वात् णमुल् न स्यात् किंतु
पूर्वकाले क्त्वाप्रत्ययः ॥ अत्र शिरःशब्दस्य न... सकेवल त्वितरस्ति ॥ शिरोऽन्य
था कृत्वा पुनः भुङ्क्ते ॥ इति कृदन्तप्रक्रिया
सोदाहरणसमाप्ताः ॥ शुभम् ॥ श्रीशारदायै नमः ॥ शुभम् ॥ शुभमस्तु ॥

४८

© Dharmarth Trust. Digitized By eGangotri

ओतो युच् ॥ आदंताद्धातोः युच् प्रत्ययः स्यात् दुःखसुखार्थेषु पदेषु ॥ खलोपवादः ॥ ईषत्पूर्वक पापाने ॥ तस्मात् ३= ॥ [illegible]
युच् ॥ युवोरनाकौ ॥ अनेन युस्थाने अन ॥ अकः सवर्णे दीर्घः ॥ सुप्रत्ययकृत विसर्गौ ॥ ईषत्पानः सोमो भवता ॥ भवता
सोमः ईषत्पानः ॥ तेने सोम ज्ञाहे सो ईषत्पानहे नाम सुखेन पानः सुखेकर के पानहै ॥ सोमः वल्लिविशेषः ॥ दुःपानः ॥
सोमो भवता ॥ दुःखेन पानइत्यर्थः ॥ अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥ प्रतिषेधार्थयोरलंखल्वोरुपपदयोः
धातोः क्त्वा स्यात् ॥ अलं पूर्वक डुदाञ् दाने ॥ तस्मात् क्त्वा प्रत्ययः ॥ दोदद्घोः ॥ अनेन दा स्थाने दथ् आदेशः
॥ खरि चेति थस्य तः ॥ डौ अक्तीनं ॥ प्रातिपदिकत्वात् सुप्रत्ययः ॥ क्त्वा तोसुन्कसुन ॥ अनेन अव्ययसंज्ञा ॥ अव्ययादा
प्सुपः ॥ अनेन सुपस्य लुक् ॥ अव्ययकृतो भावे इति वचनात् भावे क्त्वा प्रत्ययः प्रत्र ॥ अलं दत्वा ॥ इति सिद्धं ॥
अदत्वा पचति इत्यर्थः ॥ एवं पापाने तस्मात् क्त्वा प्रत्ययः ॥ अत्र घुमास्थेतीत्वम् ॥ पीत्वा खलु ॥ इति ॥ अपीत्वा
खलु व्रजति ॥ अलं खल्वोः किम् ॥ मा कार्षीः ॥ लुङ् लकारस्य प्रयोगः ॥ त्वं मा कार्षीः ॥ तुम तें कर दाहोया ॥ प्रति
षेधयोः किम् ॥ अलङ्कारः ॥ अलंकरोतीति अलङ्कारः ॥ देवदत्तः कन्यां अलङ्कारः ॥ कन्यानूं अलङ्कार कर
दाहै ॥ अत्र न क्त्वा किंतु ~~[illegible]~~ ॥ कर्मण्यण् ॥ अनेन अण् प्रत्ययः ॥ अचो ञ्णिति ॥ अनेन वृद्धिः ॥ अलंकारः ॥
समानकर्तृकयोः पूर्वकाले ॥ समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् ॥ अव्ययकृतो
भावे ॥ ष्णा शौचे ॥ धात्वादेः षः सः ॥ निमित्तापाये नैमित्तिकस्याप्यपायः ॥ स्ना इति जाते ॥ तस्मात् क्त्वा ॥ स्नात्वा
व्रजति ॥ अव्ययकृतो भावे इति वचनाद्भाव एवेत्यर्थः । भावश्चेह घञाविव ने सिद्धावस्थापन्नः किन्तु साध्याव
स्थापन्नस्तदुक्तं हरिणा ॥ अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः समानकर्तृ कत्वादियोत्यते वा भिधीयते
ति रिति ॥ यथा चैषां साध्यक्रियाद्योतकत्वं तथा प्रपञ्चितमस्माभिः शब्दार्थरत्ने ॥ अथ समानकर्तृके ति ॥
धात्वधिकारात् समानकर्तृकत्वं क्रिययोरेवेत्याशयेन धात्वर्थयोरित्युक्तं तच्च निर्धारणषष्ठ्यन्तं तथा च धात्व
र्थयोर्मध्ये पूर्वः कालो यस्य तत्र विद्यमानादित्यर्थः ॥ द्वित्वमतन्त्रम् ॥ स्नात्वा भुक्त्वा पीत्वा व्रजति ॥ पीत्वा
अत्र घुमास्थेतीत्वं ॥ अतंत्रम् नामअविवक्षितं इत्यर्थः ॥ गुणानाञ्च परार्थत्वादसंबन्धः समत्वात्स्यादिति
न्यायेन क्रियाणां नवरस्परं विशेष्यविशेषणभावः किन्तु सर्वासामेव प्रधानक्रियायामन्वय
इत्याशयेनोक्तं द्वित्वमतंत्रमिति ॥

© Dharmarth Trust. Digitized By eGangotri

यस्मु द्दिश्य आगमो विहितास्त दुगीभूतः तद्ग्रहणेन गृह्यते = २

न क्त्वा सेट् ॥ सेट् क्त्वा कित्न स्यात् ॥ शीङ् स्वप्ने ॥ तस्मात् पूर्वकाले क्त्वा प्रत्ययः ॥ शी क्त्वा शीत्वा इति जाते ॥ आर्धधातु

कस्येड् वलादेः ॥ अनेन इट् ॥ शी इ त्वा इति जाते ॥ सार्वधातुकार्धधातुकयोः ॥ अनेन गुणः ॥ एचोऽयवायावः ॥ अयादेशः ॥

शयित्वा ॥ अत्र क्ङिति च इति गुणनिषेधः तस्मात् न क्त्वा सेट् इति सूत्रं ॥ सेट् किम् ॥ कृत्वा ॥ अत्र तु गुणः न भवति कुतः ।

क्त्वाप्रत्ययस्य कित्वात् ॥ कृ धातोः अनिट्त्वात् इड् न ॥ ऊदुपधाया गोहः ॥ ऊदिते यैः निरुद्दश शी अनुनन्त्य ऊदीङ् भ्रिभिः ऊडुः

त्र्यम्बा च विनैकाचोजन्तेषु निहिताः स्मृताः ॥ अजन्तेषु धातुषु मध्ये एताः धातवः सेट् ॥ अन्ये निहिताः नामन्त्रे नि

7 पः इत्यर्थः ॥ रलो व्युपधाद्धलादेः संश्च ॥ उ श्च इश्च वि ॥ विउपधायां यस्य स व्युपधा तस्मात् व्युपधात् ॥ इवर्णो

वर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः ॥ द्युत दीप्तौ ॥ तस्मात् पूर्वकाले क्त्वा ॥ आर्धधातु

कस्येड् वलादेः ॥ अनेन इट् ॥ यस्मिन्पक्षे कित् संज्ञा । तत्र । द्युतित्वा ॥ और यस्मिन् पक्षे कित्संज्ञा न भवति

॥ तस्मिन्पक्षे पुगन्तलघूपधस्येति गुणः ॥ द्योतित्वा ॥ इति ॥ द्युतित्वा वा द्योतित्वा व्रजति ॥ एवं लिख अक्षर

के विन्यासे ॥ तस्मात् पूर्वकाले क्त्वा ॥ पक्षे आर्धधातुकस्येड् वलादेः ॥ अनेन इट् ॥ पक्षे पुगन्तलघूपधस्येति गुणः ॥

लिखित्वा वा लेखित्वा व्रजति ॥ एवं च तु वर्तने ॥ तस्मात् पूर्वकाले क्त्वा ॥ आर्धधातुकस्येड् वलादेः ॥ अने

न इट् ॥ पुगन्तेति गुणः ॥ वर्तित्वा ॥ रलः किम् ॥ सेवित्वा ॥ षिवु तन्तुसंताने ॥ तस्मात् पूर्वकाले क्त्वा ॥ धात्वा

दः षः सः ॥ सिव् त्वा इति जाते ॥ आर्धधातुकस्येड् वलादेः ॥ अनेन इट् ॥ पुगन्तलघूपधस्य च गुणः ॥

सेवित्वा ॥ इति ॥ अत्र लैः रल प्रत्याहारान्तर्गत अन्त्य वर्णः न भवति स्यात् अस्मात् कित्संज्ञा विकल्पेन

न स्यात् ॥ तस्मात् किं सिद्धं ॥ कित्संज्ञा न स्यात् ॥ इति सिद्धं ॥ अस्मात् नित्य गुणः ॥ सेवित्वा ॥ एवं

स्यात् । न तु सिवित्वा इति प्रयोगः ॥ उदितो वा ॥ उदितः परस्य क्त्वो इड् वा स्यात् ॥ शमु उपशमे ॥ उप

शमने शांति ॥ तस्मात् पूर्वकाले क्त्वा ॥ आर्धधातुकस्येड् वलादेः ॥ अनेन पक्षे इट् ॥ यस्मिन्पक्षे इट् भवति ॥

तस्मिन्पक्षे शमित्वा ॥ इति । यस्मिन्पक्षे इट् न भवति तस्मिन्पक्षे ॥ अनुनासिकस्य क्विझलोः क्ङिति ॥ अने

न दीर्घः ॥ नश्चापदान्तस्य झलि ॥ मस्य अनुस्वारः ॥ अनुस्वारस्य ययि परसवर्णः ॥ शान्त्वा ॥ इति ॥

© Dharmarth Trust. Digitized By eGangotri